# Shri Dakshinamurtidashakam

# શ્રીદક્ષિણામૂર્તિદશકમ્

## Document Information

Text title : dakShiNAmUrtidashakam

File name : dakShiNAmUrtidashakam.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, dashaka

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિદશકમ્

પુન્નાગવારિજાતપ્રભૃતિસુમસ્રગ્વિભૂષિતગ્રીવઃ ।
પુરગર્વમર્દનચણઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૧॥

પૂજિતપદામ્બુજાતઃ પુરુષોત્તમદેવરાજપદ્મભવૈઃ ।
પૂગપ્રદઃ કલાનાં પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૨॥

હાલાહલોજ્જ્વલગલઃ શૈલાદિપ્રવરગણૈર્વીતઃ ।
કાલાહઙ્કૃતિદલનઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૩॥

કૈલાસશૈલાનલયો લીલાલેશેન નિર્મિતાજાણ્ડઃ ।
બાલાબ્જકૃતાવતંસઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૪॥

ચેલાજિતકુન્દદુગ્ધો લોલઃ શૈલાધિરાજતનયાયામ્ ।
ફાલવિરાજદ્વહ્નિઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૫॥

ન્યગ્રોધમૂલવાસી ન્યક્કૃતચન્દ્રો મુખામ્બુજાતેન ।
પુણ્યૈકલભ્યચરણઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૬॥

મન્દાર આનતતતેર્વૃન્દારકવૃન્દવન્દિતપદાબ્જઃ ।
વન્દારુપૂર્ણકરુણઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૭॥

મુક્તામાલાભૂષસ્ત્યક્તાશપ્રવરયોગિભિઃ સેવ્યઃ ।
ભક્તાખિલેષ્ટદાયી પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૮॥

મુદ્રામાલામૃતઘટપુસ્તકરાજત્કરામ્ભોજઃ ।
મુક્તિપ્રદાનનિરતઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૯॥

સ્તોકાર્ચનપરિતુષ્ટઃ શોકાપહપાદપઙ્કજસ્મરણઃ ।
લોકાવનકૃતદીક્ષઃ પુરતો મમ ભવતુ દક્ષિણામૂર્તિઃ ॥ ૧૦॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીદક્ષિણામૂર્તિદશકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Dakshinamurtidashakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*